IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# धर्मान्तरणम् ; तस्य च जयन्तभट्टदृष्ट्या समाधानम्।

**नारायणदासः, शोधच्छात्रः, SSIS, JNU**

## शोधपत्रसारः

धर्मोऽस्ति मानवसभ्यतायाः इतिहासे एकमत्यन्तं महत्त्वपूर्णं तथा मौलिकमुपादानम्। कालक्रमेण विविधसमये विविधकारणात् काचिद् व्यक्तिर्स्वधर्मं परित्यज्य अन्यधर्मं स्वीकरोति। एतदेव धर्मान्तरणमि'ति नाम्ना प्रसिद्धम्। शोधपत्रेऽस्मिन् धर्मान्तरणस्य स्वरूपं कारणमैतिहासिकं मतञ्चेति विवेचितम्। विशेषतया सामाद्युपायचतुष्टयेन धर्मान्तरणस्य विभिन्नदृष्टान्ताः अत्रालोचिताः। नैयायिकजयन्तभट्टदृष्ट्या एतस्याः समस्यायाः समाधानमपि निर्देशितमत्र। अनेन समीक्षणेन स्पष्टं भवति यद् धर्मान्तरणं केवलं धार्मिकविश्वासपरिवर्तनं न, अपि तु सामाजिकसांस्कृतिकराजनैतिकपरिस्थितिभिः सम्बद्धैका जटिला प्रक्रिया। जयन्तभट्टस्य एतादृशी दार्शनिकदृष्टिभङ्गिता वर्तमानसामाजे धर्मपरिवर्तनसंबद्धसमस्यानां विश्लेषणाय समाधानाय च महत्त्वपूर्णं मार्गदर्शनं दातुं शक्नोति।

## कूटशब्दाः

धर्मान्तरणम्, वैदिकादिधर्मः, सामाद्युपायचतुष्टयम्, जयन्तभट्टः, न्यायः, आगमडम्बरञ्च।

## प्रस्तावना

मानवसभ्यतायाः इतिहासे अत्यन्तगुरुत्वपूर्णतत्त्वत्वेन धर्मस्य प्रसिद्धिर्लक्ष्यते। जगतः सर्वे केनचिद् धर्मेण सम्बद्धाः सन्ति। तद्यथा – जलस्य शैत्यमग्नेः उष्णत्वं राज्ञः प्रजारक्षणं प्रजाणां राष्ट्रनियमपालनं शिक्षकस्य शिक्षादानं विद्यार्थिनः विद्याग्रहणं प्रभृतयः धर्मस्य स्वरूपं बोधयन्ति। कर्तव्यविषयो भवति धर्मः। शैत्यादिधर्मेण एव जलादीनामस्तित्वं ज्ञायते। भारतीयज्ञानपरम्परायां धर्मस्यैतस्य व्यापकोऽर्थः समुपलभ्यते। इदानीं तु धर्मेण वैदिकः बौद्धः जैनः इस्लामः ख्रीष्टः यहूदी पारसी चेत्यादिः विशेषतया निर्दिश्यते। विविधकारणाद् व्यक्तिर्स्वधर्मं परित्यजति। धर्मान्तरणमेका प्रक्रिया, व्यक्तिर्यत्र स्वातन्त्र्येण परतन्त्र्येण वा पूर्वधर्मं परित्यज्य अन्यधर्ममेकं स्वीकरोति। एषा प्रक्रिया इतिहासे बहुधा वितर्कं संघातं च जनयति। भारतीयोपमहादेशेऽपि सुप्राचीनकालादेव धर्मान्तरणं लक्ष्यते। धर्मान्तरणमिदं वर्त्तमानसमाजस्य अतीव चिन्तनप्रदः विषयोऽस्ति। प्रायेण विश्वस्य सर्वेषु प्रदेशेषु समस्यैषा दरीदृश्यते। साम दानं भेदः दण्डश्चेति उपायचतुष्टयेन धर्मान्तरणनीतिरियं विश्वस्य विविधप्रान्तेष्वद्यापि बहुलतया प्रचलति। केषुचित् स्थानेषु धर्मयुद्धमपि संवादमाध्यमेन लभ्यते। प्रायेण 1200 वर्षपूर्वं प्रसिद्धेन नैयायिकेन जयन्तभट्टेन स्वकीये दृश्यकाव्ये प्रसङ्गेऽस्मिन् संकेतोऽपि प्रदत्तः। तत्कृते आगमडम्बराख्यरूपके धर्मान्तरणस्य वास्तविकं चित्रं परिदृश्यते। बौद्धजैनचार्वाकप्रभृतिसम्प्रदायानामाविर्भावाद् वैदिकधर्मानुष्ठानं क्रमशोऽलुप्यत। अत्र

बौद्धजैनचार्वाकप्रभृतिसम्प्रदायानां दार्शनिकतत्त्वान् आदाय नाटकीयचरित्रेभ्यः बौद्धादिमतानां खण्डनेन नैयायिकं तथा वैदिकं मतमुपस्थाप्येते। वैदिकधर्मीयभावनायाः पुनर्जागरणार्थं रूपकमिदं लिखितमि'त्यनुमीयते।

## 1) सामनीत्या धर्मान्तरणम्

सुप्राचीनकाले बहूनां जनानां बौद्धादिकं धर्मं प्रति रुचिर्जाता। तद्यथा – इतिहासानुसारतः राजा अशोकः प्रारम्भे वैदिकधर्मावलम्बी आसीत्। कलिङ्गयुद्धानन्तरं तस्मिन् बौद्धधर्मीयसिद्धान्तस्य विशेषप्रतिफलनं लक्षितम्। अतः सो बौद्धधर्मं गृहीतवान्। सप्तमशतके राजा हर्षवर्धनोऽपि अहिंसां परिदृश्य बौद्धधर्मं गृहीतवान्।[1] डाँ. वि. आर. आम्बेदकरः स्वीयकाले बहुधर्मग्रन्थं पठितवान्। सामाजिकवैषम्यतायाः निवृत्त्यर्थं बौद्धधर्मेऽधिकमानवतां परिलक्ष्य 1956 ख्रीष्टाब्दे सः तद्धर्मं गृहीतवान्।[2] 1902 ख्रीष्टाब्दे पाश्चात्यदार्शनिकः चिन्ताविच्च 'Ananda Metteyya' स्वेच्छया ख्रीष्टधर्मं त्यक्त्वा बौद्धधर्मं गृहीतवान्।[3] अद्यतने समये मनुष्याणां मध्ये धर्मं प्रति विश्वासः क्रमशः लुप्यते। अतोऽस्याः नीत्याः प्रयोगः स्वल्पतमोऽस्ति।

## 2) दाननीत्या धर्मान्तरणम्

दाननीत्या धर्मान्तरणं मुख्यतया दरिद्रजनानां मध्ये परिलक्ष्यते। प्रयागराजस्य हरिभानपुराख्यग्रामे धनादीनां प्रलोभनप्रदानेन तत्र विद्यमानानां दरिद्रजनानां धर्मान्तरणस्याभियोगः सम्प्राप्यते। तत्र अभियुक्ताः धर्मान्तरणस्य कर्तारः आरक्षकैः धृताः।[4] महाराष्ट्रस्य अमरावत्याख्यस्थाने केरलतः समागताः केचिद् जनाः धनप्रलोभनेन धर्मान्तरणं कुर्वन्ति स्म। स्थानीयजनानाम् अभियोगात् ते धृताः।[5] **2022** तमवर्षे 'थैलेसीमिया'-रोगेण पीडितस्य त्रिवर्षीयस्य पुत्रस्य निःशुल्कचिकित्सायाः प्रतिफलरूपेण कर्नाटकराज्ये स्थितं सनातनपरिवारमेकं ख्रीष्टधर्मे धर्मान्तरणं कर्तुं प्रेरितमासीत्। एतादृशव्ययबहुलचिकित्सार्थं तस्मिन् परिवारे धर्मान्तरणसिद्धान्तोऽपि जातः। पश्चात्तु कर्णाटकस्थितस्य 'BLDE' इति चिकित्सालयस्य सहायतया धर्मान्तरणविचारो लुप्तः।[6] अपि च बहुकालं यावद् धनादीनां प्रदानेन दरिद्रोपजातीनां धर्मान्तरणकार्य्यं चलति। कुत्रचित् कार्यमिदं 'NGO' इति माध्यमेनापि साध्यते।

## 3) भेदनीत्या धर्मान्तरणम्

दीर्घकालात् सनातनेतरसम्प्रदायैः वेदादीनां ग्रन्थानाम् अपवादेन सनातनादीनां सम्प्रदायानां धर्मान्तरणं दरीदृश्यते। अद्यापि नीतिरियं निरन्तरं प्रचलति। कैश्चिद् धर्मान्धमौलवादिजनैः अनया भेदनीत्या

---

[1] https://sikshalay.co.in/harshavardhanas-religion/
[2] https://drbrambedkar.in/conversion-to-buddhism/
[3] https://encyclopediaofbuddhism.org/wiki/Ananda_Metteyya?
[4] https://www.opindia.com/2025/10/uttar-pradesh-phulpur-police-bust-christian-conversion-racket-on-bajrang-dals-complaint-3-arrested-one-absconding-read-what-fir-says/
[5] https://www.theweek.in/wire-updates/national/2025/12/31/kerala-pastor-among-8-held-in-maharashtra-over-religious-conversion-bid-cm-vijayan-slams-move.html?
[6] https://hindupost.in/dharma-religion/missionary-hospital-in-tn-asked-hindu-family-to-convert-in-return-for-free-treatment/

धर्मान्तरणं क्रियते। तद्यथा – इसलामप्रचारकः डॉं. जाकिरनायकः स्वीयव्याख्याने कल्क्याब्दुल्लयोर्मध्येऽभेदत्वं निर्दिशति।[7] अधिकांशपण्डितानां मतमनुसृत्य सिद्धान्तोऽयं सम्पूर्णतया असमीचीनमस्ति। तेन एव 'न तस्य प्रतिमा अस्ति' इत्यस्य अपव्याख्यया परोक्षत्वेन मूर्तिपूजाविरोधिमतमपि उपस्थाप्यते।[8] वस्तुतः एषा प्रतिमा उपमानार्थे व्यवह्रियते।[9] 2025 ख्रीष्टाब्दे उत्तरप्रदेशे काचिद् जालालुद्दिनाख्यव्यक्तिः त्रुटिपूर्णवैदिकमतप्रदानेन धर्मान्तरणस्याभियोगाद् धृतोऽभवत्।[10]

## 4) दण्डनीत्या धर्मान्तरणम्

एकादशे शतके यूरोपस्य विभिन्नजनपदेषु क्रुसडाः यहूदीनामुपरि आक्रमणं कृतवन्तः। प्राणनाशभयाद् बहवः यहूदीजनाः ख्रीष्टधर्मं गृहीतवन्तः। ये न गृहीतवन्तः, ते हताः।[11] पञ्चदशशतके स्पेनस्य क्याथलिकराजः फार्डिनान्दः ग्राणाडाधिग्रहणानन्तरं धर्मान्तरणनीतिं प्रावर्तत। यहूद्यादीनां धर्मपालने विशेषवाधाप्रदानेन समं देशत्यागस्य वार्ताऽपि तेन प्रेषिता। फलतः अनेकयहूद्यादिजनाः प्राणरक्षार्थं ख्रीष्टधर्मे धर्मान्तरिताः।[12] भारते पर्तुगीजशासनकाले गोयायाः स्थानीयवैदिकधर्मावलम्बिनः अत्याचारिताः। तत्र बहुमन्दिरमपि ध्वस्तम्। सम्पत्तिहरणादिविविधभयप्रदर्शनेनापि ते धर्मान्तरिताः।[13] सप्तदशशतके औरङ्गजेवस्य शासनकाले इसलामेतरधर्मावलम्बिनामुपरि जिज्याख्यकरः प्रवर्तितः। एष एकोऽर्थनैतिकदण्डविधिः आसीद्, यस्तु वैदिकादिधर्मावलम्बिनामुपरि प्रयुक्तः। विशिष्टेतिहासविदः यदुनाथसरकारस्य मतमनुसृत्य एतादृशधर्मीयकराद् मुक्त्यर्थं बहवो जनाः इसलामधर्मं गृहीतवन्तः।[14] उपासनालयध्वंसार्थम् अनेकाधिकारिकाः अपि विविधप्रान्तेषु तेन नियोजिताः।[15] पाकिस्थाने विशेषतया सिन्धुपञ्जावप्रदेशयोर्मध्ये धर्मदृष्ट्या संख्यालघुनारीणां बलपूर्वकं धर्मान्तरणं गुरुसमस्यात्वेन चिह्नितम्। 2025 ख्रीष्टाब्दीयं मानवाधिकारसंस्थायाः तथ्यमनुसृत्य पाकिस्थाने प्रायेण सहस्रनारीणाम् अपहरणात्परं बलेन धर्मान्तरणं कृत्वा विवाहः कृतः। अस्मिन्नेव वर्षे सिन्धुप्रदेशस्य शाहदादपुरे सनातनीबालाचतुष्टयस्यापहरणात्परं सबलं धर्मान्तरणस्याभियोगः लब्धः। न्यायालयेन एतत्स्वैच्छिकधर्मान्तरणमि'ति कथितम्। मानवाधिकारेण तु मनस्तात्त्विकबलत्वेन तत्सूचितम्।[16] 2025 ख्रीष्टाब्दे वङ्गदेशस्य मयमनसिंहे सनातनधर्मावलम्बिन्याः वृष्टिचक्रवर्त्याख्यबालायाः अपहरणात्परं

---

[7] https://www.youtube.com/shorts/66rT9ZY9i2k (Peace Tv).
[8] https://www.youtube.com/watch?v=vOliXtG1Quo
[9] प्रतिमा प्रतिमानमुपमानम्॥32.3.॥ प्रजापतिसूक्तम् (महीधरभाष्यम्), पृ॰ 473.
[10] http://www.thehindu.com/news/national/ed-raids-in-up-mumbai-in-religious-conversion-racket-case-against-chhangur baba/article69821743.ece?hl=te-IN
[11] https://www.researchgate.net/publication/327124374_Forced_conversion_during_the_First_Crusade
[12] https://www.britannica.com/topic/Spanish-Inquisition
[13] https://en.wikipedia.org/wiki/Goa_Inquisition?hl=te-IN
[14] Many Hindus who were unable to pay turned Muham-madan, to obtain relief from the insults of the collec-tors......Aurangzib rejoices that by such exactions these Hindus will be forced into embracing the Muhammadan faith. History of Aurangazeb (Vol – 3), पृ॰ 275.
[15] The destruction of Hindu places of worship was one of their chief duties, and so large was the number of officers employed in the task that a "Director General" (darogha) had to be placed over them to guide their activity. History of Aurangazeb (Vol – 3), Page no - 267.
[16] https://globalforumcdwd.org/no-consent-no-childhood-forced-conversions-and-the-collapse-of-minority-rights-in-pakistan/?hl=te-IN

न्यायव्यवस्थायाः अपव्यवहारेण धर्मान्तरणाभियोगः लभ्यते। 'HRCBM' इति मानवाधिकारसंस्थया प्रसङ्गेऽस्मिन् विस्तृतं प्रकृष्टन्यायसम्मतं तथ्यमुपस्थापितम्।[17] 'USCIRF' इति संस्थयाऽपि स्वीयशोधपत्रान्तेऽल्पसंख्यकानाम् असुरक्षया सह मानसव्याघातस्योल्लेखः कृतः।[18] नाइजेरियायाः 'Boko Haram' 'ISWAP' चेत्याख्योग्रवादिसमूहद्वयेन ख्रीष्टादिधर्मावलम्बिनः सकौशलमुत्पीडिताः भवन्ति।[19] केषुचिद् उत्तराञ्चलीयेषु राज्येषु शरियाख्यविधिर्प्रचलति।[20] तत्र इसलामतः ख्रीष्टधर्मे धर्मान्तरितजनानामुपरि तीव्रसामाजिकं विधिमूलकञ्च बलं प्रयुज्यते। एतत्तु परोक्षत्वेन दण्डनीत्याः अन्यतमं रूपमेकम्। अफगानिस्तानेऽपि तालिबान्-शासने धर्मीयस्वाधीनता न दृश्यते। अत्रापि शरियाख्यविधिर्प्रचलति। 'OpenDoors' इत्यस्य तथ्यमनुसृत्य धर्मत्यागस्तत्र मृत्युदण्डः इति मन्यते।[21] दण्डनीत्या धर्मान्तरणस्यान्यतमप्रदेशोऽस्ति इराणः। सुप्राचीनकालतः प्रदेशेऽस्मिन् पारसिकधर्मः प्रचलति स्म। सप्तमशतके अरववासिभिः पारस्यविजयानन्तरं तत्र विद्यमानराष्ट्रीयपारसिकधर्मस्य क्रमशोऽवसानं जातम्। पारसिकानामुपरि सामाजिकभेदभावः जिजियाख्यकरप्रणयनं सबलं धर्मान्तरणञ्चेति दृष्टम्।[22] धर्मान्तरणस्य भयाद् बहवः पारसिकाः भारतं प्रति समागताः।[23] अपि च तत्र धर्मीयसंख्यालघूनामुपरि वैषम्यदमनयोः संवादः क्रमशो लभ्यते।[24]

## जयन्तभट्टदृष्ट्या समाधानम्

जयन्तभट्टकृतागमडम्बराख्यरूपकाद् ज्ञायते यत्शङ्करवर्मा ख्रीष्टीयनवमशतके काश्मीरप्रदेशस्य अतीव सुप्रसिद्धः राजा आसीत्। एषः धर्मपरायणो राजा सयत्नं स्वराज्यं शास्ति स्म। अत्रैव नैयायिकः जयन्तः भट्टः सगौरवं मन्त्रित्वेन राज्ञे उपदेशं ददाति स्म। तस्मिन् समयेऽपि बौद्धजैनचार्व्वाकप्रभृतिसम्प्रदायानां प्रभावाद् वैदिकधर्मानुष्ठानं क्रमतः अलुप्यत। ग्रन्थेऽस्मिन् सामादिनीतिषु मुख्यतया भेदनीत्या धर्मान्तरणस्य विविधं तथ्यं समुपलभ्यते। जयन्तभट्टदृष्ट्या वेदादिकं शास्त्रीयं ज्ञानमस्माभिर्ग्रहीतव्यम्। अन्येषामपि सम्प्रदायानाम् अयौक्तिकं धर्मीयं ज्ञानं प्रति ध्येयम्। तद्यथा – बौद्धधर्मे उपदिष्टं यदज्ञानमेव जनानां संसारबन्धनकारणम्। आर्य्यसत्यचतुष्टयज्ञानेन जननमरणस्य बन्धनं दूरीभवतीति। तत्र रूपके कश्चिद् उपासकः बौद्धभिक्षुकमुद्दिश्य वदति **'भो भदन्त, यदा तावत् नास्त्येव कोऽपि आत्मा, क इदानीं संसारदुःखम् अनुभवति? को वा एतदुत्तीर्य निर्वाणागारे प्रतिव्रजति? भो भदन्त, यदि नास्ति स्थिर आत्मा परलोके कस्य कर्मभोगः?'**[25] एवञ्च तस्य प्रश्नेन यत्प्रतीयते अस्थिरस्य अनित्यस्य वा आत्मनः मुक्तिर्न सम्भवति। वेदशास्त्रेऽयमात्मा नित्यत्वेन एव स्वीकृतः। नित्यात्मना एव परलोके

---

17 https://www.hrcbm.org/wp-new/kidnapping-forced-conversion-and-a-dangerous-precedent-the-case-of-bristi-chakrabarty/?hl=te-IN

18 Some religious minorities and Muslim women emphasized that they continue to face societal-level discrimination from more hardline Islamic groups, and they emphasized ..... । Hasan, S. "Factsheet Bangladesh" July 2025, Page – 7, https://www.uscirf.gov/sites/default/files/2025-07/2025%20Factsheet%20Bangladesh.pdf?hl=te-IN.

19 https://www.cfr.org/articles/boko-harams-violence-against-women-and-girls-demands-justice

20 https://www.uscirf.gov/countries/nigeria?hl=te-IN

21 https://www.opendoorsuk.org/persecution/world-watch-list/afghanistan/

22 https://en.wikipedia.org/wiki/Persecution_of_Zoroastrians?hl=te-IN

23 https://www.britannica.com/topic/Parsi

24 https://www.amnesty.org/en/location/middle-east-and-north-africa/middle-east/iran/report-iran/?hl=te-IN

25 आगमडम्बरम् (प्रथमाङ्कः), पृ॰ 7.

कर्मफलं भुज्यते। जैनसम्प्रदायेण निरूप्यते यद् जिनोपदिष्टं तत्त्वमनुसृत्यैव संसारबन्धनाद् मुक्तिर्लभ्यते।[26] तेषां दृष्ट्या वैदिकतत्त्वानां ज्ञानं मोक्षलाभेऽन्तरायो भवति। धर्मीयसचेतनतां वर्धयितुं शास्त्रीयं रूपकमनुष्ठेयम् – **अभिनवागमडम्बरं नाम किमपि रूपकं प्रयोक्तव्यमि'ति।**[27] तृतीयाङ्के दृश्यते यत् केचित् शैवसन्ताः लोकालयाद् दूरवर्त्तिषु निर्जनस्थानेषु तिष्ठन्ति स्म। तेषामुपरि राज्ञोऽधिकतमः क्रोधः जातः। तेषां सन्तानां वचनेन एव सन्दर्भेऽस्मिन् सम्यक्तया ज्ञातम्।[28] यदि कोऽपि धर्मान्तरणकार्ये धृतः भवति, तर्हि राजादेशानुसारेण तस्य दण्डविधानं कर्तव्यमिति – **वेदबाह्याः इति राष्ट्रान्निर्वासिताः।**[29] श्रीनगरीयरणस्वामिमन्दिरस्य विष्णुदेवता तत्र स्थितानामधिवासिनां प्रधानदेवत्वेन प्रसिद्धा आसीत्। वी. राघवन्-महोदयस्य मतमनुसृत्य सम्प्रति मन्दिरमिदं जियारतपीरहाजीमुहाम्मदस्य इसलामिकस्मृतिस्तम्भत्वेन चिह्नितम्।[30]

## उपसंहारः

उपर्युक्तसमीक्षणात् प्रतीयते यद् धर्मान्तरणं केवलमेकं धार्मिकविश्वासस्य परिवर्तनमात्रं न, अपि तु सामाजिकराजनैतिकसांस्कृतिकपरिस्थितीनां परिणामत्वेन अपि दृश्यते। इतिहासे बहुषु क्षेत्रेषु सामाद्युपायचतुष्टयेन एव जनाः धर्मान्तरिताः। एतेषु कुत्रचित् स्वेच्छया, कुत्रचित् प्रलोभनेन, कुत्रचिद् मिथ्याप्रचारेण, पुनश्च कुत्रचिद् भयदण्डाभ्यां धर्मान्तरणमिदं सम्पादितम्। जयन्तभट्टाचार्य्येण स्वीयागमडम्बराख्यदार्शनिकतत्त्वबहुलरूपकेऽस्मिन् समस्येयं दार्शनिकदृष्ट्या विवेचिता। तस्य मतेन प्रकृष्टतर्कज्ञानमनुसृत्य धर्मीयसचेतनतायाः विकासेन एव धर्मसम्बद्धा विभ्रान्तिर्दूरीभवति। अतो निःसंशयं वक्तुं यत्शक्यते जयन्तभट्टस्य चिन्तनमिदम् अद्यापि अस्मदीयसमाजे धर्मान्तरणसम्बद्धासु समस्यासु मार्गदर्शकत्वेन ग्राह्यमि'ति।

# सन्दर्भग्रन्थसूची

आगमडम्बरम्, र° जयन्तभट्टः, सप्पा° वी. राघवन् अनन्तलालठक्कुरश्च, Shri Sudarshan Press, Darbhanga, 1964.

The New Vedic Selection, सप्पा° Telang & Chaubey, Bharatiya Vidya Prakashan, Delhi, 1976.

Āgamaḍambara, र° जयन्तभट्टः, सप्पा° Dezső Csaba, University of Oxford, 2004.

History of Aurangzeb, Writer – Jadunath Sarkar, Sri Gouranga Press, Mirjapur Street, Calcutta, 1928

---

[26] जिनचरणस्मरणोद्गत ..... । आगमडम्बरम् 2/5, पृ° 32.

[27] आगमडम्बरम् (प्रथमाङ्कः), पृ° 3.

[28] बन्धनस्थलं नयन्ति, शूले वा निक्षिपन्ति, वृक्षे वा पाशेन उल्लम्बयन्ति । आगमडम्बरम् (तृतीयाङ्कः), पृ° 45.

[29] आगमडम्बरम् (तृतीयाङ्कः), पृ° 46.

[30] आगमडम्बरम् (Introduction), पृ° 9.

# अन्तर्जालसूची

https://www.amnesty.org
https://www.britannica.com
https://www.cfr.org/
https://drbrambedkar.in/
https://encyclopediaofbuddhism.org
https://en.wikipedia.org
https://globalforumcdwd.org
https://hindupost.in/
https://www.hrcbm.org/
https://www.opendoorsuk.org
http://www.thehindu.com/
https://www.theweek.in
https://www.opindia.com
https://www.researchgate.net
https://sikshalay.co.in/